# rAmanAthAShTakam

# રામનાથાષ્ટકમ્

## Document Information

Text title : rAmanAthAShTakam

File name : rAmanAthAShTakam.itx

Category : shiva, aShTaka

Location : doc_shiva

Transliterated by : NA

Proofread by : PSA Easwaran

Latest update : January 13, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# રામનાથાષ્ટકમ્

ગજાજિનં શૂલકપાલપાણિનં
જટાધરં ચન્દ્રકલાવતંસમ્ ।
ઉમાપતિં કાલકાલમ્ ત્રિનેત્રં
શ્રીરામનાથં શિરસા નમામિ ॥ ૧॥

સમસ્તપાપક્ષયદિવ્યનામં
પ્રપન્નસંસારગતૌષધં ત્વમ્ ।
નામાજ્જનાભીષ્ટવરપ્રદં ચ
શ્રીરામનાથં શિરસા નમામિ ॥ ૨॥

સામ્બં પ્રવાલેન્દુશિલાસમાભં
શમ્ભું જટાઽલઙ્કૃતચન્દ્રમૌલિમ્ ।
દિક્પૂતવાસોવસનં વરેણ્યં
શ્રીરામનાથં શિરસા નમામિ ॥ ૩॥

પુરત્રયધ્વંસનતીવ્રબાણં
કામાઙ્ગસંહારકપાલનેત્રમ્ ।
સન્દર્શનાત્ત્વત્સ્થલમસ્તપાપં
શ્રીરામનાથં શિરસા નમામિ ॥ ૪॥

ભવાન્ધકરોગ્રગભસ્તિમન્તં
સંસરકાન્તારમહાદવાગ્નિમ્ ।
મનોરથઃપૂરણકાલમેઘં
શ્રીરામનાથં શિરસા નમામિ ॥ ૫॥

સિતાંશુવક્ત્રં સ્મિતચન્દ્રિકાભં
કપાલમાલોડુગણપ્રચારમ્ ।
ઋતધ્વજં વ્યોમતનું મહાન્તં
શ્રીરામનાથં શિરસા નમામિ ॥ ૬॥

સુરાસુરૈર્જ્યેષ્ઠસુરેન્દ્રવન્દ્યં
સુરાસુરોદ્ભાસુરભૂસુરાધ્યમ્ ।
સુરાપગાશોભિતશેખરં તં
શ્રીરામનાથં શિરસા નમામિ ॥ ૭॥

સેતોર્મધ્યે પર્વતાગ્રે પવિત્રે
ગૌર્યા સાકં ભ્રાજમાનં મહેશમ્ ।
જ્યોતિસ્વરૂપં ચન્દ્રસુર્યાગ્નિનેત્રં
શ્રીરામનાથં શિરસા નમામિ ॥ ૮॥

રામેણૈવં સંસ્તુતો રામનાથઃ
પ્રાદુર્ભૂતો લિઙ્ગમધ્યાદ્ભવાન્યા ।
દૃષ્ટ્વા રુદ્રં રાઘવઃ પૂર્ણકામઃ
નત્વા સ્તુત્વા પ્રાર્થયામાસ શમ્ભુમ્ ॥ ૯॥

ઇતિ રામનાથાષ્ટકં સમ્પૂર્ણમ્ ॥

Proofread by PSA Easwaran

*rAmanAthAShTakam*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*